# ॥ श्री उच्छिष्टमहागणपति ध्यानम् ॥

[The Upasana, significance and secret of Sri Ucchishta Mahaganapathi are known to very few advanced Sadhakas. This is a small Dhyana that was composed last year on the day of Ucchishta ganesha Jayanthi.]

मूलाधारे सुयोन्याख्ये चिदग्निवरमण्डले ।

समासीनं पराशक्तिविग्रहं गणनायकम् ॥

रक्तोत्पलसमप्रख्यं नीलमेघसमप्रभम् ।

रत्नप्रभालसद्दीप्तमुकुटाञ्चितमस्तकम् ॥

करुणारससुधाधारास्त्रवदक्षित्रयान्वितम् ।

अक्षिकुक्षिमहावक्षः गण्डशूकादिभूषणम् ॥

पाशाङ्कुशेक्षुकोदण्डपञ्चबाणलसत्करम् ।

नीलकान्तिघनीभूतनीलवाणीसुपार्श्वकम् ॥

सुत्रिकोणाख्यनीलाङ्गरसास्वादनतत्परम् ।

पत्न्यालिङ्गितवामाङ्गं सप्तमातृनिषेवितम् ॥

ब्रह्मविष्णुमहेन्द्रादिसंप्रपूजितपादुकम् ।

महद्द्वयपदोवाच्यपादुकामन्त्रसारकम् ॥

नवावरणयज्ञाख्य वरिवस्याविधिप्रियम् ।

पञ्चावरणयज्ञाख्य विधिसंपूज्यपादुकम् ॥

अखण्डकोटिब्रह्माण्डामण्डलेश्वरमव्ययम् ।

रदनाक्षरसंपूर्णमन्त्रराजस्वरूपिणम् ॥

गिरिव्याहृतिवर्णात्ममन्त्रतत्वप्रदर्शकम् ।

अरुणारुणतनुच्छायमहाकामकलात्मकम् ॥

महागोप्यमहाविद्या प्रकाशितकलेबरम् ।

चिच्छिवं चिद्भवं शान्तं त्रिगुणादिविवर्जितम् ॥

अष्टोत्तरशताभिख्यकलान्यासविधिप्रियम् ।

चिदाकारमहाद्वीपमध्यवाससुविग्रहम् ॥

चिदब्धिमथनोत्पन्नचित्सारघनविग्रहम् ।

वाचामगोचरं शान्तं शुद्धचैतन्यरूपिणम् ॥

मूलकन्दस्थचिद्देशनवताण्डवपण्डितम् ।

षडम्बुरुहसंस्थायिपरचिद्व्योमभासुरम् ॥

अकारादिक्षकारान्तवर्णलक्षितचित्सुखम् ।

अकाराक्षरनिर्दिष्टप्रकाशमयविग्रहम् ॥

हकाराख्यविमर्शात्मप्रभादीप्तजगत्त्रयम् ।

महाहंसजपध्यानविधिज्ञातस्वरूपकम् ॥

सदोदितमहाप्रज्ञाकारं संसारतारकम् ।

मोक्षलक्ष्मीप्रदातारं कालातीतमहाप्रभुम् ॥

नामरूपादिसम्भिन्ननित्यपूर्णचिदुत्तमम् ।

प्रत्यग्भूतमहाप्रज्ञागात्रगोचरविग्रहम् ॥

महाकुण्डलिनीरूपं षट्चक्रनगरेश्वरम् ।

अप्राकृतमहादिव्यचैतन्यात्मस्वरूपिणम् ॥

नादबिन्दुकलातीतं कार्यकारणवर्जितम् ।

षडम्बुरुहचक्रान्तः स्फुरत्सौदामिनीप्रभम् ॥

तत्त्वमस्यादिवाक्यार्थपरिबोधनपण्डितम् ।

ब्रह्मादिकीटपर्यन्तव्याप्तसम्वित्सुधारसम् ॥

इच्छाज्ञानक्रियानन्दसर्वतन्त्रस्वतन्त्रिणम् ।

हृदयग्रन्थिभिद्विद्यादर्शनोत्सुकमानसम् ॥

पञ्चकृत्यपरेशानं महात्रैपुरविग्रहम् ।

श्रीचक्रराजमध्यस्थशून्यग्राममहेश्वरम् ॥

ब्रह्मविद्यास्वरूपश्रीललितारूपधारिणम् ।

वशिन्याद्यावृतं साध्यं अद्वयानन्दवर्धनम् ॥

आदिशङ्कररूपेशदक्षिणामूर्तिपूजितम् ।

असंस्पृष्टमहाप्रज्ञाभिख्याद्वैतस्थितिप्रभम् ॥

एवं सञ्चिन्तयेद्देवं उच्छिष्टगणनायकम् ।

नीलतारासमेतं तु सच्चिदानन्दविग्रहम् ॥